Edition : December 2023/013 Price : Free

मातृका MAATRIKA

# मातृका

A CORE SHARADA TEAM FOUNDATION INITIATIVE

REINCARNATION OF THE SHARADA SCRIPT

Download Our Free "Satisar" Andriod app

नमस्ते शारदे देवी काश्मीरपुरवासिनि
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥

𑆤𑆩𑆱𑇀𑆠𑆼 𑆯𑆳𑆫𑆢𑆼 𑆢𑆼𑆮𑆵 𑆑𑆳𑆯𑇀𑆩𑆵𑆫𑆥𑆶𑆫𑆮𑆳𑆱𑆴𑆤𑆴
𑆠𑇀𑆮𑆳𑆩𑆲𑆁 𑆥𑇀𑆫𑆳𑆫𑇀𑆡𑆪𑆼 𑆤𑆴𑆠𑇀𑆪𑆁 𑆮𑆴𑆢𑇀𑆪𑆳𑆢𑆳𑆤𑆁 𑆖 𑆢𑆼𑆲𑆴 𑆩𑆼𑇆



Mahadeva by Kishni Pandita

## LEARN SHARADA TEACH SHARADA

संस्कृति और सभ्यता को जानने की एक पहल

**PRESERVE - PROTECT - PROPAGATE**

Chief Editor:- Kuldip Dhar
Catalog Designer :- Sunil Mahnoori
Supporting Editors :- Veronica Peer
Parul Bradoo & Others



# संपादकीय / Editorial

Kuldip Dhar

𑆠𑆼𑆘𑆂 𑆑𑇀𑆰𑆩𑆳 𑆣𑆸𑆠𑆴𑆂(𑆯) 𑆯𑆿𑆖𑆩𑇀 , 𑆃𑆢𑇀𑆫𑆾𑆲𑆾 𑆤𑆳𑆠𑆴𑆩𑆳𑆤𑆴𑆠𑆳 𑇅
𑆨𑆮𑆤𑇀𑆠𑆴 𑆱𑆩𑇀𑆥𑆢𑆁(𑆤) 𑆢𑆽𑆮𑆵𑆩𑇀, 𑆃𑆨𑆴𑆘𑆳𑆠𑆱𑇀𑆪 𑆨𑆳𑆫𑆠 𑇆

𑆯𑇀𑆫𑆵𑆩𑆢𑇀𑆨𑆳𑆓𑆮𑆢𑆓𑆵𑆠𑆳 𑆯𑇀𑆬𑆾𑆑 𑇑𑇖/𑇓

**तेजः क्षमा धृतिः(श) शौचम् , अद्रोहो नातिमानिता ।**
**भवन्ति सम्पदं(न) दैवीम्, अभिजातस्य भारत ॥**

**श्रीमद्भागवदगीता श्लोक १६/३**

***Sublimity, forbearance, fortitude, external purity, bearing enmity to none and absence of self-esteem, these are the marks of him, who is born with the divine endowments, Arjuna.***

Dear Readers,

We, at Core Sharada Team, have been making consistent efforts at preserving and promoting Sharada script and literature written in the script over that past five years now. We understand that there are at least 1500 manuscripts that are lying with some individuals and institutions. Since most of these are written in Sanskrit and we had very few scholars of Sanskrit with knowledge of Sharada script, these have unfortunately remained away from public view and from intelligentsia. Some might have been lost for good.

Kashmir and it's people have gone through lot of ups and downs in the last 2000 years which adversely effected culture, customs, thought, philosophy and so also Kashmir Shaivism. It was in recent Kashmir history that Kashmir Shaivism was resurrected by Swami Ram with the Royal patronage of Dogra King Pratap Singhji. Swami Ram through his disciple Swami Mahtab Kak and latter's disciple Swami Lakshmanjoo , besides great philosophers from Banaras. They tried to put the Kashmir Shaivism in public domain. Most of the credit goes to Swami Lakshman joo and his disciples in Kashmir, India and abroad who wrote about it and printed some books. Unfortunately, there has not been any single Institute, who has worked on popularizing it or researching on it.

We, at Core Sharada Team, would love to help in putting together all manuscripts written in Sharada by transliterating these and putting these in public domain. As a part of this initiative, please read our article on Shiv Mahimnah Stotram.

We have the expertise in Sharada script together with Sanskrit & Kashmiri language. We request all people from Kashmir, Institutions or any other individuals or Institutions who have any material on Kashmiri Shaivism to come forward and reach us on Maatrika.cst@gmail.com or admin@shardalipi.com. We intend to work on this theme in the coming year.

Core Sharada Team is working on a lot of initiatives which at various stages of completion. You can look forward to these in the Second Annual Edition which is due in February'24.

We have tried to increase our reach to all in every nook & corner from India and abroad through. Shall appreciate your help in circulating Maatrika in your domain of influence and help us in our efforts of free circulation of literature written in Sharada. For directly receiving a copy of Maatrika, please send your email address to Maatrika.cst@gmail.com. You can take advantage of our free Basic and Advanced Sharada Classes by writing to info@shardalipi.com.

Wish you all a Wonderful, Happy and Successful YEAR - 2024 in advance.

𑆑𑆶𑆬𑆢𑆵𑆥 𑆣𑆫

# Inside


- Page 1 • Mahadeva Painting by Kishni Pandita
- Page 2 • Editorial
- Page 4 • Ishavasya Upnishad by A K Razdan; Sharada Art by S Kardar
- Page 5 • Shiva Mahimna Stotra by CST
- Page 12 • Sharada Quiz 3 & Answers to Quiz 2
- Page 13 • Sage Valmiki by Anitha ji
- Page 14 • Temples of Kashmir by Sanjay Kaul
- Page 15 • Laghubhattaraka by Ketu Ramachandrasekhar • Åsh Katrû by Mrinalini Safaya
- Page 16 • Kashmiri Praveshika- Page 3
- Page 17 • Shiva Sutra Sec. 2 by Gokal Dembi
- Page 18 • Art by Suresh Kardar
- Page 19 • Sharada Project by Smriti Seva Mandalam
- Page 21 • Shúri Bäth • Reading Kashmiri - Devanagari Vowels
- Page 22 • देहस्थ-देव्ता-चक्र-स्तोत्रम् -१
- Page 23 • Readers' Feedbacks
- Page 24 • CST - Way Forward • Sharada Lipi Development Part -5
- Page 25 • Kashmiri Kavita by Deepak Sopori
- Page 26 • Sharada Varnamala
- Page 27 • Social Media Posts • Our Publications • Donation Request




Art by S.Kardar

**माँ दुर्गा के ३२ नाम**

ॐ दुर्गा , दुर्गतिशमनी , दुर्गापद्वीनिवारिणी , दुर्गमच्छेदिनी , दुर्गसाधिनी , दुर्गनाशिनी , दुर्गतोद्धारिणी , दुर्गहंत्री , दुर्गमापहा , दुर्गमज्ञानदा , दुर्गदैत्यलोकदवानला , दुर्गमा , दुर्गमालोका , दुर्गमात्मस्वरूपिणी , दुर्गमार्गप्रदा , दुर्गमविद्या , दुर्गमाश्रिता , दुर्गमज्ञानसंस्थाना , दुर्गमध्यानभासिनी , दुर्गमगा , दुर्गमगा , दुर्गमार्थस्वरूपिणी , दुर्गमासुरसंहन्त्री , दुर्गमायुधधारिणी , दुर्गमाङ्गी , दुर्गमता , दुर्गम्या , दुर्गमेश्वरी , दुर्गमीमा , दुर्गभामा , दुर्गभा , दुर्गदारिणी ।



# श्री ईशावास्य उपनिषद् ( मंत्र - ११) / 𑆯𑇀𑆫𑆵 𑆆𑆯𑆳𑆮𑆳𑆱𑇀𑆪 𑆇𑆥𑆤𑆴𑆰𑆢𑇀 ( 𑆩𑆁𑆠𑇀𑆫 - 𑇑𑇑)

A.K.Razdan

**विद्या चाविद्यां च यस्तद् वेदोभयगं् सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥११॥**

**𑆮𑆴𑆢𑇀𑆪𑆳 𑆖𑆳𑆮𑆴𑆢𑇀𑆪𑆳𑆁 𑆖 𑆪𑆱𑇀𑆠𑆢𑇀 𑆮𑆼𑆢𑆾𑆨𑆪𑆓𑆁 𑆱𑆲𑇅**
**𑆃𑆮𑆴𑆢𑇀𑆪𑆪𑆳 𑆩𑆸𑆠𑇀𑆪𑆶𑆁 𑆠𑆵𑆫𑇀𑆠𑇀𑆮𑆳 𑆮𑆴𑆢𑇀𑆪𑆪𑆳𑇁𑆩𑆸𑆠𑆩𑆯𑇀𑆤𑆶𑆠𑆼 𑇆𑇑𑇑𑇆**

जो विद्या (दिव्य ज्ञान) और अविद्या (कर्म कार्य प्रक्रिया)) दोनों को एक साथ जानता है, दोनों को साथ साथ समझने की कोशिश करता है, केवल वही बारम्बार होने वाले जन्म मृत्यु के प्रभाव मुक्त हो सकता है। वह अविद्या से मृत्यु को पार करता है और विद्या से अमृतत्व को प्राप्त हो जाता है॥११॥

भौतिक जगत (material world) की सृष्टि के समय से ही प्रत्येक जीव स्थायी (everlasting) जीवनप्राप्त करने का प्रयास करता रहता है, लेकिन प्रकृति (nature) का नियम ऐसा है कि कोई भी मृत्यु से बच नहीं सकता है। कोई भी मरना नहीं चाहता है, ना ही कोई बूढ़ा या बीमार होना चाहता है। सारे जीव सुख की खोज में रहते हैं और दु:खों से निवृत्ति चाहते हैं। किन्तु किसी भी जीव को मृत्यु, बुढ़ापा, बीमारी एवं दु:खों से छुटकारा नहीं पा सकता है। ईशावास्य के इस मन्त्र में उपनिषद के ऋषि हमें बताते हे कि जो बुद्धिमान व्यक्ति विद्या और अविद्या, दिव्य ज्ञान एवं भौतिक जगत में कार्य प्रक्रिया का संमिश्रण बुद्ध मिता से करने में सक्षम होता है वह व्यक्ति अविद्या से मृत्यु पर क़ाबू पा सकता हे और विद्या से अमृतत्व को प्राप्त हो जाता है। निष्काम कार्य (अविद्या) करने से भी हम आध्यात्मिक जीवन में मृत्यु (हर दिन के मरने पर) पर क़ाबू पा सकते हैं और दिव्य ज्ञाते प्राप्त कर सकते हैं जो वास्तव में अमृतत्व की ही प्राप्ति है। जनम और मृत्यु, क्षय और रोग, बन्धन और मुक्ति,दु:ख और सुख, सफलता और असफलता आदि सभी अनुभव केवलहमारे अहंकार केन्द्र में उपलब्ध हैं और हमारे भ्रम निर्मित आभास में उपलब्ध है। जी आवरण हटने से शुद्ध जागरूकता चमकने लगती है, अहंकार वहीं समाप्त होता है और ईश्वरत्व का अनुभव प्रारंभ होता है और संसार में फिर से अपने आप के बांधने के लिए न तो पुनर्जन्म होता है और न कर्मों की श्रृंखला में ही फँस सकता है। यह ही अमृतत्व की प्राप्ति कहलाती है।



𑆃𑆡 𑆯𑇀𑆫𑆵 𑆯𑆴𑆮 𑆩𑆲𑆴𑆩𑇀𑆤𑆂𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆩𑇀
𑇄 𑆤𑆩𑆂 𑆯𑆴𑆮𑆳𑆪
𑆄𑆣𑆵𑆤𑆳𑆩𑆓𑆣𑆁 𑆢𑆴𑆮𑇀𑆪𑆁 𑆮𑇀𑆪𑆳𑆣𑆵𑆤𑆳𑆁 𑆩𑆷𑆬𑆑𑆸𑆤𑇀𑆠𑆤𑆁
𑆇𑆥𑆢𑇀𑆫𑆮𑆳𑆟𑆳𑆁 𑆢𑆬𑆤𑆁 𑆩𑆲𑆳𑆢𑆼𑆮𑆩𑆶𑆥𑆳𑆱𑇀𑆩𑆲𑆼𑇆

**अथ श्री शिव महिम्नःस्तोत्रम्**
**ॐ नमः शिवाय**
**आधीनामगधं दिव्यं व्याधीनां मूलकृन्तनं**
**उपद्रवाणां दलनं महादेवमुपास्महे॥**

This body is the store house of all troubles and diseases. I therefore worship Bhagwan Mahadev Shiva who, like a celestial healer shall stamp down all my troubles and misfortunes.

𑆃𑆲𑆁 𑆥𑆳𑆥𑆵 𑆥𑆳𑆥 𑆑𑇀𑆰𑆥𑆟 𑆤𑆴𑆥𑆶𑆟𑆳𑆂 𑆯𑆁𑆑𑆫! 𑆨𑆮𑆳𑆤𑇀
𑆃𑆲𑆁 𑆨𑆵𑆠𑆾 𑆨𑆵𑆠𑆳𑆨𑆪𑆮𑆴𑆠𑆫𑆟𑆼 𑆠𑆼 𑆮𑇀𑆪𑆱𑆤𑆴𑆠𑆳𑇅
𑆃𑆲𑆁 𑆢𑆵𑆤𑆾 𑆢𑆵𑆤𑆾𑆢𑇀𑆣𑆫𑆟 𑆮𑆴𑆣𑆴 𑆱𑆘𑇀𑆘𑆱𑇀𑆠𑇀𑆮𑆩𑆴𑆠𑆫𑆤𑇀
𑆤 𑆘𑆳𑆤𑆼𑇁𑆲𑆁 𑆮𑆑𑇀𑆠𑆶𑆁 𑆑𑆫𑆶 𑆱𑆑𑆬 𑆯𑆾𑆖𑇀𑆪𑆼 𑆩𑆪𑆴 𑆑𑆸𑆥𑆳𑆩𑇀𑇆𑇑𑇆

**अहं पापी पाप क्षपण निपुणाः शंकर! भवान्**
**अहं भीतो भीताभयवितरणे ते व्यसनिता।**
**अहं दीनो दीनोद्धरण विधि सज्जस्त्वमितरन्**
**न जानेऽहं वक्तुं करु सकल शोच्ये मयि कृपाम्॥१॥**

Bhagwan Ashutosh Shiva is the One Source to grant us fearlessness from all worldly fears and troubles. He is the only Refuge for all who are afflicted by Samsarik troubles and tribulations. May, my Shiv worship cleanse me of all dross. Only my clean mind is the sure root to reach Him. My mind and my outgoing sense perceptions are becoming an obstacle for me to reach Him. I therefore surrender to Him because He alone can help me to evolve.

𑆘𑆤𑆱𑇀𑆠𑇀𑆮𑆠𑇀𑆥𑆳𑆢𑆳𑆧𑇀𑆘𑆯𑇀𑆫𑆮𑆟𑆩𑆤𑆤𑆣𑇀𑆪𑆳𑆤𑆤𑆴𑆥𑆶𑆟𑆂
𑆱𑇀𑆮𑆪𑆁 𑆠𑆼 𑆤𑆴𑆱𑇀𑆠𑆵𑆫𑇀𑆟𑆳 𑆤 𑆒𑆬𑆶 𑆑𑆫𑆶𑆟𑆳 𑆠𑆼𑆰𑆶 𑆑𑆫𑆟𑆳𑇅
𑆨𑆮𑆼 𑆬𑆵𑆤𑆼 𑆢𑆵𑆤𑆼 𑆩𑆪𑆴 𑆩𑆤𑆤𑆲𑆵𑆤𑆼 𑆤 𑆑𑆫𑆶𑆟𑆳
𑆑𑆡𑆁 𑆤𑆳𑆡 𑆒𑇀𑆪𑆳𑆠𑆱𑇀𑆠𑇀𑆮𑆩𑆱𑆴 𑆑𑆫𑆶𑆟𑆳𑆱𑆳𑆓𑆫 𑆅𑆠𑆴𑇆𑇒𑇆

**जनस्त्वत्पादाब्जश्रवणमननध्याननिपुणः**
**स्वयं ते निस्तीर्णा न खलु करुणा तेषु करणा।**
**भवे लीने दीने मयि मननहीने न करुणा**
**कथं नाथ ख्यातस्त्वमसि करुणासागर इति॥२॥**

O Lord, in case You only come to the rescue of Your devotees, that is no great feat. Rescuing one, who has nowhere to seek refuge, like me, who is held deep in the mire of worldly distress, who does not know how to mediate and worship You, is real rescuing. In case You abandon me, how can You defend Your title of being called "KARUNASAGAR", the Ocean of Mercy.

𑆩𑆣𑆶𑆱𑇀𑆦𑆵𑆠𑆳 𑆮𑆳𑆖𑆂 𑆥𑆫𑆩𑆩𑆩𑆸𑆠𑆁 𑆤𑆴𑆫𑇀𑆩𑆴𑆠𑆮𑆠𑆫-
𑆠𑆮 𑆧𑇀𑆫𑆲𑇀𑆩𑆤𑇀 𑆑𑆴𑆁 𑆮𑆳𑆓𑇁𑆥𑆴 𑆱𑆶𑆫𑆓𑆶𑆫𑆾𑆫𑇀𑆮𑆴𑆱𑇀𑆩𑆪𑆥𑆢𑆩𑇀
𑆩𑆩𑆠𑇀𑆮𑆼𑆠𑆳𑆁 𑆮𑆳𑆟𑆵𑆁 𑆓𑆶𑆟𑆑𑆡𑆤𑆥𑆶𑆟𑇀𑆪𑆼𑆤 𑆨𑆮𑆠𑆂
𑆥𑆶𑆤𑆳𑆩𑆵𑆠𑇀𑆪𑆫𑇀𑆡𑆼𑇁𑆱𑇀𑆩𑆴𑆤𑇀𑆥𑆶𑆫𑆩𑆡𑆤! 𑆧𑆶𑆢𑇀𑆣𑆴𑆫𑇀𑆮𑇀𑆪𑆮𑆱𑆴𑆠𑆳 𑇆𑇓𑇆

**मधुस्फीता वाचः परमममृतं निर्मितवतर-**
**तव ब्रह्मन् किं वागऽपि सुरगुरोर्विस्मयपदम्**
**ममत्वेतां वाणीं गुणकथनपुण्येन भवतः**
**पुनामीत्यर्थेऽस्मिन्पुरमथन! बुद्धिर्व्यवसिता॥३॥**

O Brahman! Do even Brihaspati's praises cause wonder to You, the author of the nectar like sweet Vedas? O destroyer of the three cities, the thought that by praising Your glories I shall purify my speech, has prompted me to undertake the work.

𑆠𑆮𑆽𑆯𑇀𑆮𑆫𑇀𑆪𑆁 𑆪𑆠𑇀𑆠𑆘𑇀𑆘𑆓𑆢𑆶𑆢𑆪𑆫𑆑𑇀𑆰𑆳𑆥𑇀𑆫𑆬𑆪𑆑𑆸𑆠𑇀𑇅
𑆠𑇀𑆫𑆪𑆵𑆮𑆱𑇀𑆠𑆶 𑆮𑇀𑆪𑆱𑇀𑆠𑆁 𑆠𑆴𑆱𑆸𑆰𑆶 𑆓𑆶𑆟𑆨𑆴𑆤𑇀𑆤𑆳𑆱𑆶 𑆠𑆤𑆶𑆰𑆶𑇅
𑆃𑆨𑆮𑇀𑆪𑆳𑆤𑆳𑆩𑆱𑇀𑆩𑆴𑆤𑇀𑆮𑆫𑆢! 𑆫𑆩𑆟𑆵𑆪𑆳𑆩𑆫𑆩𑆟𑆵𑆁
𑆮𑆴𑆲𑆤𑇀𑆠𑆶𑆁 𑆮𑇀𑆪𑆳𑆑𑇀𑆫𑆾𑆯𑆵𑆁 𑆮𑆴𑆢𑆣𑆠 𑆅𑆲𑆽𑆑𑆼 𑆘𑆝𑆣𑆴𑆪𑆂𑇆𑇔𑇆

**तवैश्वर्यं यत्तज्जगदुदयरक्षाप्रलयकृत्।**
**त्रयीवस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु।**
**अभव्यानामस्मिन्वरद! रमणीयामरमणीं**
**विहन्तुं व्याक्रोशीं विदधत इहैके जडधियः॥४॥**

O Giver of boons! Some stupid people produce arguments- pleasing to the ignorant but in fact awful- to refute Your Divinity, which creates, preserves and destroys the world. Which is divided into the three bodies (Brahma, Vishnu and Shiva) according to the three Guna's, and which is described in the three Vedas.

𑆑𑆴𑆩𑆵𑆲𑆂 𑆑𑆴𑆁𑆑𑆳𑆪𑆂 𑆱 𑆒𑆬𑆶 𑆑𑆴𑆩𑆶𑆥𑆳𑆪𑆱𑇀𑆠𑇀𑆫𑆴𑆨𑆶𑆮𑆤𑆁
𑆑𑆴𑆩𑆳𑆣𑆳𑆫𑆾 𑆣𑆳𑆠𑆳 𑆱𑆸𑆘𑆠𑆴 𑆑𑆴𑆩𑆶𑆥𑆳𑆢𑆳𑆤𑆩𑆴𑆠𑆴 𑆖𑇅
𑆃𑆠𑆫𑇀𑆑𑆽𑆯𑇀𑆮𑆫𑇀𑆪𑆼 𑆠𑇀𑆮𑆪𑇀𑆪𑇁𑆤𑆮𑆱𑆶𑆫𑆢𑆶𑆂𑆱𑇀𑆡𑆾 𑆲𑆠𑆣𑆴𑆪𑆂
𑆑𑆶𑆠𑆫𑇀𑆑𑆾𑆪𑆁 𑆑𑆳𑆁𑆯𑇀𑆖𑆴𑆤𑇀𑆩𑆶𑆒𑆫𑆪𑆠𑆴 𑆩𑆾𑆲𑆳𑆪 𑆘𑆓𑆠𑆳𑆩𑇀 𑇆𑇕𑇆

**किमीहः किंकायः स खलु किमुपायस्त्रिभुवनं**
**किमाधारो धाता सृजति किमुपादानमिति च।**
**अतर्कैश्वर्ये त्वय्यऽनवसुरदुःस्थो हतधियः**
**कुतर्कोयं कांश्चिन्मुखरयति मोहाय जगताम्॥५॥**

To fulfill what desire, assuming what form with what instruments, support and material does that Creator create the three worlds? This kind of futile argumentation about You, whose divine nature is beyond the reach of intellect, makes the perverted vociferous, and brings delusion to men.

𑆃𑆘𑆟𑇀𑆩𑆳𑆤𑆾 𑆬𑆾𑆑𑆳𑆂 𑆑𑆴𑆩𑆮𑆪𑆮𑆮𑆤𑇀𑆠𑆾𑇁𑆥𑆴 𑆘𑆓𑆠𑆳-
𑆩𑆣𑆴𑆰𑇀𑆜𑆳𑆠𑆳𑆫𑆁 𑆑𑆴𑆁 𑆨𑆮𑆮𑆴𑆣𑆴𑆫𑆤𑆳𑆢𑆸𑆠𑇀𑆪 𑆨𑆮𑆠𑆴𑇅
𑆃𑆤𑆵𑆯𑆾 𑆮𑆳 𑆑𑆶𑆫𑇀𑆪𑆳𑆢 𑆨𑆶𑆮𑆤 𑆘𑆤𑆤𑆼 𑆑𑆂 𑆥𑆫𑆴𑆑𑆫𑆾
𑆪𑆠𑆾 𑆩𑆤𑇀𑆢𑆳𑆱𑇀𑆠𑇀𑆮𑆳𑆁 𑆥𑇀𑆫𑆠𑇀𑆪𑆩𑆫𑆮𑆫 𑆱𑆁𑆯𑆼𑆫𑆠 𑆅𑆩𑆼 𑇆𑇖𑇆

अजण्मानो लोकाः किमऽवयववन्तोऽपि जगता-
मधिष्ठातारं किं भवविधिरनादृत्य भवति।
अनीशो वा कुर्याद भुवन जनने कः परिकरो
यतो मन्दास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

O Lord of gods! Can the worlds be without origin, though they have bodies? Is their creation possible without a creator? Who else but God can initiate creation of the worlds? Because they are fools, they raise doubts about Your existence.

𑆠𑇀𑆫𑆪𑆵 𑆱𑆳𑆁𑆒𑇀𑆪𑆁 𑆪𑆾𑆓𑆂 𑆥𑆯𑆶𑆥𑆠𑆴𑆩𑆠𑆁 𑆮𑆽𑆰𑇀𑆟𑆮𑆩𑆴𑆠𑆴
𑆥𑇀𑆫𑆨𑆴𑆤𑇀𑆤𑆼 𑆥𑇀𑆫𑆱𑇀𑆡𑆳𑆤𑆼 𑆥𑆫𑆩𑆴𑆢𑆩𑆢𑆂 𑆥𑆡𑇀𑆪𑆩𑆴𑆠𑆴 𑆖𑇅
𑆫𑆶𑆖𑆵𑆤𑆳𑆁 𑆮𑆽𑆖𑆴𑆠𑇀𑆫𑇀𑆪𑆳𑆢𑆸𑆘𑆶𑆑𑆶𑆛𑆴𑆬𑆤𑆳𑆤𑆳𑆥𑆡𑆘𑆶𑆰𑆳𑆁
𑆤𑆸𑆟𑆳𑆩𑆼𑆑𑆾 𑆓𑆩𑇀𑆪𑆱𑇀𑆠𑇀𑆮𑆩𑆱𑆴 𑆥𑆪𑆱𑆳𑆩𑆫𑇀𑆟𑆮 𑆅𑆮 𑇆𑇗𑇆

**त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति**
**प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।**
**रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां**
**नृणामेको गम्यस्त्वमसि पयसामर्णव इव ॥७॥**

Different paths (to realization) are enjoyed by the three Vedas, by Sankhya, Yoga, Pashupata (Shiva) doctrine and Vaishnava Shastras. People follow different paths, straight or crooked, according to their temperament, depending on which they consider best, or most appropriate and reach You alone just as rivers enter the ocean.

𑆩𑆲𑆾𑆑𑇀𑆰𑆂 𑆒𑆛𑇀𑆮𑆳𑆁𑆓𑆁 𑆥𑆫𑆯𑆶𑆫𑆘𑆴𑆤𑆁 𑆨𑆱𑇀𑆩 𑆦𑆟𑆴𑆤𑆂
𑆑𑆥𑆳𑆬𑆁 𑆖𑆼𑆠𑆵𑆪𑆠𑇀𑆠𑆮 𑆮𑆫𑆢 𑆠𑆤𑇀𑆠𑇀𑆫𑆾𑆥𑆑𑆫𑆟𑆩𑇀𑇅
𑆱𑆶𑆫𑆳𑆱𑇀𑆠𑆳𑆁 𑆠𑆳𑆩𑆸𑆢𑇀𑆣𑆴𑆁 𑆮𑆴𑆢𑆣𑆠𑆴𑆠𑆶 𑆨𑆮𑆢𑇀𑆨𑇀𑆫𑆷𑆥𑇀𑆫𑆟𑆴𑆲𑆴𑆠𑆳𑆁
𑆤𑆲𑆴 𑆱𑇀𑆮𑆳𑆠𑇀𑆩𑆳𑆫𑆳𑆩𑆁 𑆮𑆴𑆰𑇀𑆪𑆩𑆸𑆓𑆠𑆸𑆰𑇀𑆟𑆳 𑆨𑇀𑆫𑆩𑆪𑆠𑆴 𑇆𑇘𑇆

**महोक्षः खट्वांगं परशुरजिनं भस्म फणिनः**
**कपालं चेतीयत्तव वरद तन्त्रोपकरणम्।**
**सुरास्तां तामृद्धिं विदधतितु भवद्भ्रूप्रणिहितां**
**नहि स्वात्मारामं विष्यमृगतृष्णा भ्रमयति ॥८॥**

O Giver of boons! A great bull, a wooden hand rest, an axe, a tiger skin, ashes, serpents, a human skull and other such things; these are all Your own, though simply by casting Your eyes on gods, You have given them great treasures which they enjoy. Indeed, one whose delights in the Self cannot be deluded by the mirage of sense objects.

𑆣𑇀𑆫𑆶𑆮𑆁 𑆑𑆯𑇀𑆖𑆴𑆠𑇀 𑆱𑆫𑇀𑆮𑆁 𑆱𑆑𑆬𑆩𑆥𑆫𑆱𑇀𑆠𑆶 𑆣𑇀𑆫𑆶𑆮𑆩𑆴𑆢𑆁
𑆥𑆫𑆾 𑆣𑇀𑆫𑆿𑆮𑇀𑆪𑆳𑆣𑇀𑆫𑆿𑆮𑇀𑆪𑆼 𑆘𑆓𑆠𑆴 𑆓𑆢𑆠𑆴 𑆮𑇀𑆪𑆱𑇀𑆠𑆮𑆴𑆰𑆪𑆼𑇅
𑆱𑆩𑆱𑇀𑆠𑆼𑇁𑆥𑇀𑆪𑆼𑆠𑆱𑇀𑆩𑆴𑆤𑇀𑆥𑆶𑆫𑆩𑆡𑆤! 𑆠𑆽𑆫𑇀𑆮𑆴𑆱𑇀𑆩𑆴𑆠 𑆅𑆮
𑆱𑇀𑆠𑆶𑆮𑆚𑇀𑆘𑆴𑆲𑇀𑆮𑆼𑆩𑆴𑆠𑇀𑆮𑆳𑆁 𑆤 𑆒𑆬𑆶𑆤𑆤𑆶 𑆣𑆸𑆰𑇀𑆜𑆳 𑆩𑆶𑆒𑆫𑆠𑆳 𑇆𑇙𑇆

**ध्रुवं कश्चित् सर्वं सकलमपरस्तु ध्रुवमिदं**
**परो ध्रौव्याध्रौव्ये जगति गदति व्यस्तविषये।**
**समस्तेऽप्येतस्मिन्पुरमथन! तैर्विस्मित इव**
**स्तुवञ्जिह्वेमित्वां न खलुननु धृष्टा मुखरता ॥९॥**

O Destroyer of the demon Pura, some say that the whole universe is external while others say that all is transitory. Others still, hold that it is eternal and non-eternal, having different characteristics. Bewildered by all this, I do not feel ashamed to praise You; indeed, my loquacity is an indication of my boldness.

𑆠𑆮𑆽𑆯𑇀𑆮𑆫𑇀𑆪𑆁 𑆪𑆠𑇀𑆤𑆳𑆢𑇀𑆪𑆢𑆶𑆥𑆫𑆴 𑆮𑆴𑆫𑆴𑆚𑇀𑆖𑆾 𑆲𑆫𑆴𑆫𑆣𑆂
𑆥𑆫𑆴𑆖𑇀𑆗𑆼𑆠𑇀𑆠𑆶𑆁 𑆪𑆳𑆠𑆳𑆮𑆤𑆬𑆩𑆤𑆬𑆱𑇀𑆑𑆤𑇀𑆢𑆮𑆥𑆶𑆰𑆂𑇅
𑆠𑆠𑆾 𑆨𑆑𑇀𑆠𑆴 𑆯𑇀𑆫𑆢𑇀𑆣𑆳𑆨𑆫𑆓𑆶𑆫𑆶 𑆓𑆸𑆟𑆢𑇀𑆨𑇀𑆪𑆳𑆁 𑆓𑆴𑆫𑆴𑆯! 𑆪𑆠𑇀
𑆱𑇀𑆮𑆪𑆁 𑆠𑆱𑇀𑆡𑆼 𑆠𑆳𑆨𑇀𑆪𑆳𑆁 𑆠𑆮 𑆑𑆴𑆩𑆤𑆶𑆮𑆸𑆠𑇀𑆠𑆴𑆫𑇀𑆤 𑆦𑆬𑆠𑆴 𑇆𑇑𑇐𑇆

**तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चो हरिरधः**
**परिच्छेत्तुं यातावनलमनलस्कन्दवपुषः।**
**ततो भक्ति श्रद्धाभरगुरु गृणद्भ्यां गिरिश! यत्**
**स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति ॥१०॥**

O Girisha, when You took the form of a pillar of fire. Brahma trying from above and Vishnu trying from below failed to measure You. Afterwards, when they praised You with great faith and devotion. You revealed yourself to them of Your own accord; does not surrendering to You always bear fruit?

𑆃𑆪𑆠𑇀𑆤𑆳𑆢𑆳𑆱𑆳𑆢𑇀𑆪 𑆠𑇀𑆫𑆴𑆨𑆶𑆮𑆤𑆩𑆮𑆽𑆫𑆴𑆮𑇀𑆪𑆠𑆴𑆑𑆫𑆁
𑆢𑆯𑆳𑆱𑇀𑆪𑆾 𑆪𑆢𑇀 𑆧𑆳𑆲𑆷𑆤𑆨𑆸𑆠 𑆫𑆟𑆑𑆟𑇀𑆝𑆷𑆥𑆫𑆮𑆯𑆳𑆤𑇀𑇅
𑆯𑆴𑆫𑆂 𑆥𑆢𑇀𑆩𑆯𑇀𑆫𑆼𑆟𑆵𑆫𑆖𑆴𑆠𑆖𑆫𑆟𑆳𑆩𑇀𑆨𑆾𑆫𑆶𑆲𑆧𑆬𑆼𑆂
𑆱𑇀𑆡𑆴𑆫𑆳𑆪𑆳𑆱𑇀𑆠𑇀𑆮𑆢𑇀𑆨𑆑𑇀𑆠𑆼𑆱𑇀𑆠𑇀𑆫𑆴𑆥𑆶𑆫𑆲𑆫! 𑆮𑆴𑆱𑇀𑆦𑆷𑆫𑇀𑆘𑆴𑆠𑆩𑆴𑆢𑆩𑇀𑇆𑇑𑇑𑇆

**अयत्नादासाद्य त्रिभुवनमवैरिव्यतिकरं**
**दशास्यो यद् बाहूनभृत रणकण्डूपरवशान्।**
**शिरः पद्मश्रेणीरचितचरणाम्भोरुहबलेः**
**स्थिरायास्त्वद्भक्तेस्त्रिपुरहर! विस्फूर्जितमिदम्॥११॥**

O Destroyer of Tripura, it was because of that great devotion, which prompted him to offer his heads as lotuses to Your feet, that the ten-headed Ravana was still with arms and eager for fresh war after he had effortlessly rid the three worlds of all traces of enemies.

𑆃𑆩𑆶𑆰𑇀𑆪 𑆠𑇀𑆮𑆠𑇀𑆱𑆼𑆮𑆳𑆱𑆩𑆣𑆴𑆓𑆠𑆱𑆳𑆫𑆁 𑆨𑆶𑆘𑆮𑆤𑆁
𑆧𑆬𑆳𑆠𑇀𑆑𑆽𑆬𑆳𑆱𑆼𑆥𑆴 𑆠𑇀𑆮𑆢𑆣𑆴𑆮𑆱𑆴𑆠𑆿 𑆮𑆴𑆑𑇀𑆫𑆩𑆪𑆠𑆂𑇅
𑆃𑆬𑆨𑇀𑆪𑆳 𑆥𑆳𑆠𑆳𑆬𑆼𑇁𑆥𑇀𑆪𑆬𑆱𑆖𑆬𑆴𑆠𑆳𑆁𑆓𑆶𑆰𑇀𑆜𑆯𑆴𑆫𑆱𑆴
𑆥𑇀𑆫𑆠𑆴𑆰𑇀𑆜𑆳 𑆠𑇀𑆮𑆪𑇀𑆪𑆳𑆱𑆵𑆢𑇀𑆣𑇀𑆫𑆶𑆮𑆩𑆶𑆥𑆖𑆴𑆠𑆾 𑆩𑆶𑆲𑇀𑆪𑆠𑆴 𑆒𑆬𑆂𑇆𑇑𑇒𑇆

**अमुष्य त्वत्सेवासमधिगतसारं भुजवनं**
**बलात्कैलासेपि त्वदधिवसितौ विक्रमयतः।**
**अलभ्या पातालेऽप्यलसचलितांगुष्ठशिरसि**
**प्रतिष्ठा त्वय्यासीद्ध्रुवमुपचितो मुह्यति खलः॥१२॥**

But when he (Ravana) extended the valour of his arms- whose strength was obtained by worshiping You - to Kailas (Your abode), You moved the tip of Your toe on a head of his and he did not find a resting place even in the nether world. Truly, when the affluent the wicked become deluded.

𑆪𑆢𑆸𑆢𑇀𑆣𑆴𑆁 𑆱𑆶𑆠𑇀𑆫𑆳𑆩𑇀𑆟𑆾 𑆮𑆫𑆢! 𑆥𑆫𑆩𑆾𑆖𑇀𑆖𑆽𑆫𑆥𑆴𑆱𑆠𑆵𑆩𑇀-
𑆣𑆯𑇀𑆖𑆑𑇀𑆫𑆼 𑆧𑆳𑆟𑆂 𑆥𑆫𑆴𑆘𑆤𑆮𑆴𑆣𑆼𑆪𑆠𑇀𑆫𑆴𑆨𑆶𑆮𑆤𑆂𑇅
𑆤 𑆠𑆖𑇀𑆖𑆴𑆠𑇀𑆫𑆁 𑆠𑆱𑇀𑆩𑆴𑆤𑇀 𑆮𑆫𑆴𑆮𑆱𑆴𑆠𑆫𑆴 𑆠𑆮𑆖𑇀𑆖𑆫𑆟𑆪𑆾-
𑆫𑇀𑆤 𑆑𑆱𑇀𑆪𑆳𑆥𑇀𑆪𑆶𑆤𑇀𑆤𑆠𑇀𑆪𑆽 𑆨𑆮𑆠𑆴 𑆯𑆴𑆫𑆱𑆱𑇀𑆠𑇀𑆮𑆪𑇀𑆪𑆮𑆤𑆠𑆴𑆂𑇆𑇑𑇓

**यदृद्धिं सुत्राम्णो वरद! परमोच्चैरपिसतीम्-**
**धश्चक्रे बाणः परिजनविधेयत्रिभुवनः।**
**न तच्चित्रं तस्मिन् वरिवसितरि तवच्चरणयो-**
**र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः॥१३॥**

O Giver of boons, since Bana was the worshipper of Your feet, is it to be wondered at that he had the three worlds at his command and put to shame the wealth of Indra? What prosperity does not come from bowing down the head to You?

𑆃𑆑𑆳𑆟𑇀𑆝 𑆧𑇀𑆫𑆩𑆳𑆟𑇀𑆝𑆑𑇀𑆰𑆪𑆖𑆑𑆴𑆠𑆢𑆼𑆮𑆳𑆱𑆶𑆫𑆑𑆸𑆥𑆳
𑆮𑆴𑆣𑆼𑆪𑆱𑇀𑆪𑆳𑆱𑆵𑆢𑇀𑆪𑆱𑇀𑆠𑇀𑆫𑆴𑆤𑆪𑆤! 𑆮𑆴𑆰𑆁 𑆱𑆁𑆲𑆸𑆠𑆮𑆠𑆂𑇅
𑆱 𑆑𑆬𑇀𑆩𑆳𑆰𑆂 𑆑𑆟𑇀𑆜𑆼 𑆠𑆮 𑆤 𑆑𑆶𑆫𑆶𑆠𑆼 𑆤 𑆯𑇀𑆫𑆴𑆪𑆩𑆲𑆾
𑆮𑆴𑆑𑆳𑆫𑆾𑆥𑆴 𑆯𑇀𑆬𑆳𑆣𑇀𑆪𑆾 𑆨𑆶𑆮𑆤𑆨𑆪𑆨𑆕𑇀𑆓𑆮𑇀𑆪𑆱𑆤𑆴𑆤𑆂𑇆𑇑𑇔𑇆

**अकाण्ड ब्रमाण्डक्षयचकितदेवासुरकृपा**
**विधेयस्यासीद्यस्त्रिनयन! विषं संहृतवतः।**
**स कल्माषः कण्ठे तव न कुरुते न श्रियमहो**
**विकारोपि श्लाध्यो भुवनभयभङ्गव्यसनिनः॥१४॥**

O Three-Eyed One, who drank poison out of compassion for god's and demons when they were distraught at the sudden prospect of the destruction of the universe, surely the dark blue stain on Your throat has beautified You. Even deformity is to be admired in one who is given to freeing the world of fear.

𑆃𑆱𑆴𑆢𑇀𑆣𑆳𑆫𑇀𑆡𑆳 𑆤𑆽𑆮 𑆑𑇀𑆮𑆖𑆴𑆢𑆥𑆴 𑆱𑆢𑆼𑆮𑆳𑆱𑆶𑆫𑆤𑆫𑆼
𑆤𑆴𑆮𑆫𑇀𑆠𑆤𑇀𑆠𑆼 𑆤𑆴𑆠𑇀𑆪𑆁 𑆘𑆓𑆠𑆴 𑆘𑆪𑆴𑆤𑆾 𑆪𑆱𑇀𑆪 𑆮𑆴𑆯𑆴𑆒𑆳𑆂𑇅
𑆱 𑆥𑆯𑇀𑆪𑆤𑇀𑆤𑆵𑆯! 𑆠𑇀𑆮𑆳𑆩𑆴𑆠𑆫𑆱𑆶𑆫𑆱𑆳𑆣𑆳𑆫𑆟𑆩𑆨𑆷𑆠𑇀
𑆱𑇀𑆩𑆫𑆂 𑆱𑇀𑆩𑆫𑇀𑆠𑆮𑇀𑆪𑆳𑆠𑇀𑆩𑆳 𑆤𑆲𑆴 𑆮𑆯𑆴𑆰𑆶 𑆥𑆡𑇀𑆪𑆂 𑆥𑆫𑆴𑆨𑆮𑆂𑇆𑇑𑇕𑇆

**असिद्धार्था नैव क्वचिदपि सदेवासुरनरे**
**निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः।**
**स पश्यन्नीश! त्वामितरसुरसाधारणमभूत्**
**स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः॥१५॥**

O Lord, the god of love, Kama Deva, whose arrows never fail in the world of Devatas and people. He, Kamadev however, became memory (was reduced to ashes), he looked at you to influence you, thinking of you to be an ordinary Devata. An insult to the resolve of a Self-Controlled ,is worthy of punishment.

𑆩𑆲𑆵 𑆥𑆳𑆢𑆳𑆔𑆳𑆠𑆳𑆢𑇀𑆮𑇀𑆫𑆘𑆠𑆴 𑆱𑆲𑆱𑆳 𑆱𑆁𑆯𑆪𑆥𑆢𑆁
𑆥𑆢𑆁 𑆮𑆴𑆰𑇀𑆟𑆾𑆫𑇀𑆨𑇀𑆫𑆳𑆩𑇀𑆪𑆢𑇀𑆨𑆶𑆘𑆥𑆫𑆴𑆔𑆫𑆶𑆓𑇀𑆟𑆓𑇀𑆫𑆲𑆓𑆟𑆩𑇀𑇅
𑆩𑆶𑆲𑆶𑆫𑇀𑆢𑇀𑆪𑆿𑆫𑇀𑆢𑆿𑆱𑇀𑆡𑇀𑆪𑆁 𑆪𑆳𑆠𑇀𑆪𑇁𑆤𑆴𑆨𑆸𑆘𑆛𑆳𑆠𑆳𑆝𑆴𑆠𑆠𑆛𑆳
𑆘𑆓𑆢𑇀𑆫𑆑𑇀𑆰𑆳𑆪𑆽 𑆠𑇀𑆮𑆁 𑆤𑆛𑆱𑆴 𑆤𑆤𑆶 𑆮𑆳𑆩𑆽𑆮 𑆮𑆴𑆨𑆶𑆠𑆳𑇆𑇑𑇖

**मही पादाघाताद्व्रजति सहसा संशयपदं**
**पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम्।**
**मुहुर्द्यौर्दौस्थ्यं यात्यऽनिभृजटाताडिततटा**
**जगद्रक्षायै त्वं नटसि ननु वामैव विभुता॥१६॥**

O Lord, when You danced to save the world (as Natraja), the earth was suddenly thrown into a precarious state at the striking of Your feet. The spatial regions and the hosts of stars felt oppressed by the movement of your club like arms and the heavens became miserable as their sides were constantly struck by Your waving mated locks (hair). Indeed, it is Your mightiness which was the cause of the troubles.

𑆮𑆴𑆪𑆢𑇀 𑆮𑇀𑆪𑆳𑆥𑆵 𑆠𑆳𑆫𑆳𑆓𑆟𑆓𑆶𑆟𑆴𑆠𑆦𑆼𑆤𑆾𑆢𑇀 𑆓𑆩𑆫𑆶𑆖𑆴𑆂
𑆥𑇀𑆫𑆮𑆳𑆲𑆾 𑆮𑆳𑆫𑆳𑆁 𑆪𑆂 𑆥𑆸𑆰𑆠𑆬𑆔𑆶𑆢𑆸𑆰𑇀𑆛𑆂 𑆯𑆴𑆫𑆱𑆴 𑆠𑆼𑇅
𑆘𑆓𑆢𑇀 𑆢𑇀𑆮𑆵𑆥𑆳𑆑𑆳𑆫𑆁 𑆘𑆬𑆣𑆴𑆮𑆬𑆪𑆁 𑆠𑆼𑆤 𑆑𑆸𑆠𑆩𑆴-
𑆠𑇀𑆪𑆤𑆼𑆤𑆽𑆮𑆾𑆤𑇀𑆤𑆼𑆪𑆁 𑆣𑆸𑆠𑆩𑆲𑆴𑆩! 𑆢𑆴𑆮𑇀𑆪𑆁 𑆠𑆮 𑆮𑆥𑆶𑆂 𑇆𑇑𑇗𑇆

**वियद् व्यापी तारागणगुणितफेनोद् गमरुचिः**
**प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते।**
**जगद् द्वीपाकारं जलधिवलयं तेन कृतमि-**
**त्यनेनैवोन्नेयं धृतमहिम! दिव्यं तव वपुः ॥१७॥**

The river which pervades the sky and whose foam crests look more beautiful because of the stars and planets, seem no more than a drop of water when it flows out of Your hair (river Ganga flowing from the matted locks of Mahadev Shiva). The same river has turned the world into islands surrounded by water (continents and oceans). From this can be judged the vastness of Your form (body).

𑆫𑆡𑆂 𑆑𑇀𑆰𑆾𑆟𑆵 𑆪𑆤𑇀𑆠𑆳 𑆯𑆠𑆣𑆸𑆠𑆴𑆫𑆓𑆼𑆤𑇀𑆢𑇀𑆫𑆾 𑆣𑆤𑆶𑆫𑆡𑆾-
𑆫𑆡𑆳𑆕𑇀𑆓𑆼 𑆖𑆤𑇀𑆢𑇀𑆫𑆳𑆫𑇀𑆑𑆿 𑆫𑆡𑆖𑆫𑆟𑆥𑆳𑆟𑆴𑆂 𑆯𑆫 𑆅𑆠𑆴𑇅
𑆢𑆴𑆣𑆑𑇀𑆰𑆾𑆱𑇀𑆠𑆼 𑆑𑆾𑇁𑆪𑆁 𑆠𑇀𑆫𑆴𑆥𑆶𑆫𑆠𑆸𑆟𑆩𑆳𑆝𑆩𑇀𑆧𑆫𑆮𑆴𑆣𑆴-
𑆫𑇀𑆮𑆴𑆣𑆼𑆪𑆽𑆂 𑆑𑇀𑆫𑆵𑆝𑆤𑇀𑆠𑇀𑆪𑆾 𑆤 𑆒𑆬𑆶 𑆥𑆫𑆠𑆤𑇀𑆠𑇀𑆫𑆳𑆂 𑆥𑇀𑆫𑆨𑆶𑆣𑆴𑆪𑆂𑇆𑇑𑇘𑇆

**रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो-**
**रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति।**
**दिधक्षोस्ते कोऽयं त्रिपुरतृणमाडम्बरविधि-**
**र्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः॥१८॥**

When you wanted to burn the three cities of the demons, which were just a piece of straw for you, the earth was your chariot, Lord Brahma was Your Charioteer, the great mountain Meru your bow the sun and the moon the wheels of Your Chariot, Lord Vishnu Your arrow. Why so much of paraphernalia (सामग्री). The Lord is not dependent on others. He was just playing with the things at His command.

𑆲𑆫𑆴𑆱𑇀𑆠𑆼 𑆱𑆳𑆲𑆱𑇀𑆫𑆁 𑆑𑆩𑆬 𑆧𑆬𑆴𑆩𑆳𑆣𑆳𑆪 𑆥𑆢𑆪𑆾-
𑆫𑇀𑆪𑆢𑆼𑆑𑆾𑆤𑆼 𑆠𑆱𑇀𑆩𑆴𑆤𑇀 𑆤𑆴𑆘𑆩𑆶𑆢𑆲𑆫𑆤𑇀𑆤𑆼𑆠𑇀𑆫𑆑𑆩𑆬𑆩𑇀𑇅
𑆓𑆠𑆾 𑆨𑆑𑇀𑆠𑇀𑆪𑆶𑆢𑇀𑆫𑆼𑆑𑆂 𑆥𑆫𑆴𑆟𑆠𑆴𑆩𑆱𑆿 𑆖𑆑𑇀𑆫𑆮𑆥𑆶𑆰𑆳-
𑆱𑇀𑆠𑇀𑆫𑆪𑆳𑆟𑆳𑆁 𑆫𑆑𑇀𑆰𑆳𑆪𑆽 𑆠𑇀𑆫𑆴𑆥𑆶𑆫𑆲𑆫 𑆘𑆳𑆓𑆫𑇀𑆠𑆴 𑆘𑆓𑆠𑆳𑆩𑇀𑇆𑇑𑇙𑇆

**हरिस्ते साहस्रं कमल बलिमाधाय पदयो-**
**र्यदेकोने तस्मिन् निजमुदहरन्नेत्रकमलम्।**
**गतो भक्त्युद्रेकः परिणतिमसौ चक्रवपुषा-**
**स्त्रयाणांरक्षायै त्रिपुरहर जागर्ति जगताम्॥१९॥**

O Destroyer of the three cities, Hari (Bhagwan Vishnu) tore out

His own lotus like eye to make up for the one lotus short of 1000 while offering these to Your lotus feet. For this great devotion, You awarded Him the boon by granting to Him the Sudarshan Chakra, with which He protects the three worlds. (This offering of His eye to You for the missing flower has earned Him the Name of Sri Kamalnayan).

𑆑𑇀𑆫𑆠𑆿 𑆱𑆶𑆥𑇀𑆠𑆼 𑆘𑆳𑆓𑇀𑆫𑆠𑇀𑆠𑇀𑆮𑆩𑆱𑆴 𑆦𑆬𑆪𑆾𑆓𑆼 𑆑𑇀𑆫𑆠𑆶𑆩𑆠𑆳𑆁
𑆑𑇀𑆮𑆑𑆫𑇀𑆩 𑆥𑇀𑆫𑆣𑇀𑆮𑆱𑇀𑆠𑆁 𑆦𑆬𑆠𑆴 𑆥𑆶𑆫𑆶𑆰𑆳𑆫𑆳𑆣𑆤𑆩𑆸𑆠𑆼𑇅
𑆃𑆠𑆱𑇀𑆠𑇀𑆮𑆳𑆁 𑆇𑆠𑇀𑆥𑇀𑆫𑆼𑆑𑇀𑆰𑇀𑆪 𑆑𑇀𑆫𑆠𑆶𑆰𑆶 𑆦𑆬𑆢𑆳𑆤 𑆥𑇀𑆫𑆠𑆴𑆨𑆶𑆮𑆁
𑆯𑇀𑆫𑆶𑆠𑆾 𑆯𑇀𑆫𑆢𑇀𑆣𑆳𑆁 𑆧𑆢𑇀𑆣𑇀𑆮𑆳 𑆢𑆸𑆞𑆥𑆫𑆴𑆑𑆫𑆂 𑆑𑆫𑇀𑆩𑆱𑆶 𑆘𑆤𑆂𑇆𑇒𑇐𑇆

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां
क्वकर्म प्रध्वस्तं फलति पुरुषाराधनमृते।
अतस्त्वां उत्प्रेक्ष्य क्रतुषु फलदान प्रतिभुवं
श्रुतो श्रद्धां बद्ध्वा दृढपरिकर: कर्मसु जन:॥२०॥

When sacrifice (Homa / Yagya) has ended, You ever keep awake to bestow its fruits to the sacrificer(worshiper). How can any action bear fruit if not accompanied by worship of You, O Lord? Therefore, knowing You to be the giver of fruits of sacrifices and putting faith in the Vedas, people become resolute about the performance of sacrificial acts (seeing how You granted an instant boon to Shri Narayana on completion of his Homa of your 1000 names, Shiva Sahasranama.)

𑆑𑇀𑆫𑆴𑆪𑆳𑆢𑆑𑇀𑆰𑆾 𑆢𑆑𑇀𑆰𑆂 𑆑𑇀𑆫𑆠𑆶𑆥𑆠𑆴𑆫𑆣𑆵𑆯𑆱𑇀𑆠𑆤𑆶𑆨𑆸𑆠𑆳-
𑆩𑆸𑆰𑆵𑆤𑆳𑆩𑆳𑆫𑇀𑆠𑇀𑆮𑆴𑆘𑇀𑆪𑆁 𑆯𑆫𑆟𑆢! 𑆱𑆢𑆱𑇀𑆪𑆳𑆂 𑆱𑆶𑆫𑆓𑆟𑆳𑆂𑇅
𑆑𑇀𑆫𑆠𑆶𑆨𑇀𑆫𑆁𑆯𑆱𑇀𑆠𑇀𑆮𑆠𑇀𑆠𑆂 𑆑𑇀𑆫𑆠𑆶𑆦𑆬𑆮𑆴𑆣𑆳𑆤𑆮𑇀𑆪𑆱𑆤𑆴𑆤𑆾
𑆣𑇀𑆫𑆶𑆮𑆁 𑆑𑆫𑇀𑆠𑆶𑆂 𑆯𑇀𑆫𑆢𑇀𑆣𑆳𑆮𑆴𑆣𑆶𑆫𑆩𑆨𑆴𑆖𑆳𑆫𑆳𑆪 𑆲𑆴 𑆩𑆒𑆳𑆂𑇆𑇒𑇑𑇆

क्रियादक्षो दक्ष: क्रतुपतिरधीशस्तनुभृता-
मृषीनामार्त्विज्यं शरणद! सदस्या: सुरगणा:।
क्रतुभ्रंशस्त्वत्त: क्रतुफलविधानव्यसनिनो
ध्रुवं कर्तु: श्रद्धाविधुरमभिचाराय हि मखा:॥२१॥

O Giver of refuge, even that sacrifice where Daksha, the Lord of creation and expert in sacrifices, was the sacrificer, Rishis were the priests, Devatas participants, was destroyed by You Who are habitually the giver of the fruits of sacrifices. Surely sacrifices cause more harm and injury to the sacrificers in the absence of faith and devotion (and if not performed as per the exacting standards as prescribed by the Vedas.)

𑆥𑇀𑆫𑆘𑆳𑆤𑆳𑆡𑆁 𑆤𑆳𑆡 𑆥𑇀𑆫𑆱𑆨𑆩𑆨𑆴𑆑𑆁 𑆱𑇀𑆮𑆳𑆁 𑆢𑆶𑆲𑆴𑆠𑆫𑆁
𑆓𑆠𑆁 𑆫𑆾𑆲𑆴𑆢𑇀 𑆨𑆷𑆠𑆳𑆁 𑆫𑆴𑆫𑆩𑆪𑆴𑆰𑆶𑆩𑆸𑆰𑇀𑆪𑆱𑇀𑆪 𑆮𑆥𑆶𑆰𑆳𑇅
𑆣𑆤𑆶𑆰𑇀𑆥𑆳𑆟𑆼𑆫𑇀𑆪𑆳𑆠𑆁 𑆢𑆮𑆴𑆩𑇁𑆥𑆴 𑆱𑆥𑆠𑇀𑆫𑆳𑆑𑆸𑆠𑆩𑆶𑆩𑆁
𑆠𑇀𑆫𑆱𑆤𑇀𑆠𑆁 𑆠𑆼𑇁𑆢𑇀𑆪𑆳𑆥𑆴 𑆠𑇀𑆪𑆘𑆠𑆴 𑆤 𑆩𑆸𑆓𑆮𑇀𑆪𑆳𑆣𑆫𑆨𑆱𑆂𑇆𑇒𑇒𑇆

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं
गतं रोहिद् भूतां रिरमयिषुमृष्यस्य वपुषा।
धनुष्पाणेर्यातं दविमऽपि सपत्राकृतमुमं
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभस:॥२२॥

O Lord, the fury of You who became a hunter with a bow in hand and went after Brahma, who overcome by incestuous lust and finding his own daughter transforming into a hind (female deer), desired to ravish her in the body of a Stag (male deer) and keenly pierced by your arrows, he (Brahma) has fled to the sky.

𑆃𑆥𑆷𑆫𑇀𑆮𑆁 𑆬𑆳𑆮𑆟𑇀𑆪𑆁 𑆮𑆴𑆮𑆱𑆤𑆠𑆤𑆾𑆱𑇀𑆠𑆼 𑆮𑆴𑆩𑆸𑆯𑆠𑆳𑆁
𑆩𑆶𑆤𑆵𑆤𑆳𑆁 𑆢𑆳𑆫𑆳𑆟𑆳𑆁 𑆱𑆩𑆘𑆤𑆴 𑆱 𑆑𑆾𑆥𑆮𑇀𑆪𑆠𑆴𑆑𑆫𑆂𑇅
𑆪𑆠𑆾𑆨𑆓𑇀𑆤𑆼 𑆓𑆶𑆲𑇀𑆪𑆼 𑆱𑆑𑆸𑆢𑆥𑆴 𑆱𑆥𑆫𑇀𑆪𑆳𑆁 𑆮𑆴𑆢𑆣𑆠𑆳𑆁
𑆣𑇀𑆫𑆶𑆮𑆁 𑆩𑆾𑆑𑇀𑆰𑆾𑇁𑆯𑇀𑆬𑆵𑆬𑆁 𑆑𑆴𑆩𑆥𑆴 𑆥𑆶𑆫𑆶𑆰𑆳𑆫𑇀𑆡 𑆥𑇀𑆫𑆱𑆮𑆴𑆠𑆼𑇆𑇒𑇓𑇆

अपूर्वं लावण्यं विवसनतनोस्ते विमृशतां
मुनीनां दाराणां समजनि स कोपव्यतिकर:।
यतोभग्ने गुह्ये सकृदपि सपर्यां विदधतां
ध्रुवं मोक्षोऽश्लीलं किमपि पुरुषार्थ प्रसविते॥२३॥

Worshiping Shiva is the form of a Linga placed on a Pranaali is a very ancient practice. The Linga and the Pranaali (the Phallus and the female Yoni) is said to be the symbolic representation of Shiv and Shakhti as They are considered to be the Father and Mother of the whole universe. Therefore, Linga and Pranaali combined is concerned to be the formal representation of Shiva Shakhti. There is however, another story in Shivpurana and Tripura Rahasya according to which, the wives of Munis (Rishis) were sensually roused to see the naked body of Mahadev Bhagwan Shiva. The Munis (Rishis) could understand this condition of their wives and they cursed Mahadev that His गुह्यांग (phallus) May fall off from his body. Here in this Shloka Pushpdanta, the composer of Shivmahima Stotra is referring to this legendary incident and says that O Lord if worshiping Your अश्लील अंग (private body part) fulfills all the cherished desires of Your devotees, then worshiping Your Lotus Feet can be a source of unlimited bounty and Grace.

𑆱𑇀𑆮𑆬𑆳𑆮𑆟𑇀𑆪𑆳𑆯𑆁𑆱𑆳 𑆣𑆸𑆠𑆣𑆤𑆶𑆰𑆩𑆲𑆤𑆳𑆪 𑆠𑆸𑆟𑆮𑆠𑇀-
𑆥𑆶𑆫𑆂 𑆥𑇀𑆬𑆶𑆰𑇀𑆛𑆁 𑆢𑆸𑆰𑇀𑆛𑇀𑆮𑆳 𑆥𑆶𑆫𑆩𑆡𑆤 𑆥𑆶𑆰𑇀𑆥𑆳𑆪𑆶𑆣𑆩𑆥𑆴𑇅
𑆪𑆢𑆴 𑆱𑇀𑆠𑇀𑆫𑆽𑆟𑆁 𑆢𑆼𑆮𑆵 𑆪𑆩𑆤𑆴𑆫𑆠 𑆢𑆼𑆲𑆳𑆫𑇀𑆣𑆔𑆛𑆤𑆳-
𑆢𑆮𑆽𑆠𑆴 𑆠𑇀𑆮𑆳𑆩𑆢𑇀𑆣𑆳𑆮𑆠 𑆮𑆫𑆢 𑆩𑆶𑆓𑇀𑆣𑆳 𑆪𑆶𑆮𑆠𑆪𑆂𑇆𑇒𑇔𑇆

स्वलावण्याशंसा धृतधनुषमहनाय तृणवत्-
पुर: प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुधमपि।
यदि स्त्रैणं देवी यमनिरत देहार्धघटना-
दवैति त्वामद्धावत वरद मुग्धा युवतय:॥२४॥

O Destroyer of the three Cities, O Giver of the boons, is Mata Parvati, Who saw how You reduced Kamadeva, with his bow in hand, burnt to dust within no time still proud of Her beauty and believing that You are fascinated by Her, because You allowed Her to occupy Your half body due to very severe austerities? Ah, surely all women are under delusion (that they can bewitch anyone). O Lord, You are the One Who has completely conquered Your senses.

𑆯𑇀𑆩𑆯𑆳𑆤𑆼𑆰𑇀𑆮𑆳𑆑𑇀𑆫𑆵𑆝𑆳 𑆱𑇀𑆩𑆫𑆲𑆫 𑆥𑆴𑆯𑆳𑆖𑆳𑆂 𑆱𑆲𑆖𑆫𑆳-
𑆯𑇀𑆖𑆴𑆠𑆳𑆨𑆱𑇀𑆩𑆳𑆬𑆼𑆥𑆂 𑆱𑇀𑆫𑆓𑆥𑆴 𑆤𑆸𑆑𑆫𑆾𑆛𑆵𑆥𑆫𑆴𑆑𑆫𑆂𑇅
𑆃𑆩𑆕𑇀𑆓𑆬𑇀𑆪𑆁 𑆯𑆵𑆬𑆁 𑆠𑆮 𑆨𑆮𑆠𑆶 𑆤𑆳𑆩𑆽𑆮𑆩𑆒𑆴𑆬𑆁
𑆠𑆡𑆳𑆥𑆴 𑆱𑇀𑆩𑆫𑇀𑆠𑆸𑆟𑆳𑆁 𑆮𑆫𑆢 𑆥𑆫𑆩𑆁 𑆩𑆕𑇀𑆓𑆬𑆩𑆱𑆴𑇆𑇒𑇕𑇆

श्मशानेष्वाक्रीडा स्मरहर पिशाचा: सहचरा-
श्चिताभस्मालेप: स्रगपि नृकरोटीपरिकर:।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं
तथापि स्मर्तृणां वरद परमं मङ्गलमसि॥२५॥

O Destroyer of the god of love, O giver of the boons. You play in the cremation grounds, your companions are ghosts. You smear your body with the ashes of the dead bodies, human skulls are your garlands. All your conduct is in-auspicious. But what a wonder you promote the greatest good and auspiciousness of those who remember you.

𑆩𑆤𑆂 𑆥𑇀𑆫𑆠𑇀𑆪𑆑𑇀 𑆖𑆴𑆠𑇀𑆠𑆼 𑆱𑆮𑆴𑆣𑆩𑆮𑆣𑆳𑆪𑆳𑆠𑇀𑆠𑆩𑆫𑆶𑆠𑆂
𑆥𑇀𑆫𑆲𑆸𑆰𑇀𑆪𑆢𑇀𑆫𑆾𑆩𑆳𑆟𑆂 𑆥𑇀𑆫𑆩𑆢𑆱𑆬𑆴𑆬𑆾𑆠𑇀𑆱𑆕𑇀𑆓𑆴𑆠(𑆕𑇀𑆓𑆠𑆴)𑆢𑆸𑆯𑆂𑇅
𑆪𑆢𑆳𑆬𑆾𑆑𑇀𑆪𑆳𑆲𑇀𑆬𑆳𑆢𑆁 𑆲𑇀𑆫𑆢 𑆅𑆮 𑆤𑆴𑆩𑆘𑇀𑆘𑇀𑆪𑆳𑆩𑆸𑆠𑆩𑆪𑆼
𑆢𑆣𑆠𑇀𑆪𑆤𑇀𑆠𑆱𑇀𑆠𑆠𑇀𑆠𑇀𑆮𑆁 𑆑𑆴𑆩𑆥𑆴 𑆪𑆩𑆴𑆤𑆱𑇀𑆠𑆠𑇀𑆑𑆴𑆬 𑆨𑆮𑆳𑆤𑇀𑇆𑇒𑇖𑇆

मनः प्रत्यक् चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गित(ङ्गति)दृशः।
यदालोक्याह्लादं ह्रद इव निमज्जयाभृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत्किल भवान्॥२६॥

You are indeed that inexpressible Truth which the Yogis realise through concentrating their minds on the Self and controlling the breath according to directions laid down in the scriptures / Shastras, and realizing which Truth, they experience rapturous thrills and shed profuse tears of joy; swimming as it were in a pool of nectar, they enjoy inner bliss.

𑆠𑇀𑆮𑆩𑆫𑇀𑆑𑆱𑇀𑆠𑇀𑆮𑆁 𑆱𑆾𑆩𑆱𑇀𑆠𑇀𑆮𑆩𑆱𑆴 𑆥𑆮𑆤𑆱𑇀𑆠𑇀𑆮𑆁 𑆲𑆶𑆠𑆮𑆲
𑆱𑇀𑆠𑇀𑆮𑆩𑆳𑆥𑆱𑇀𑆠𑇀𑆮𑆁 𑆮𑇀𑆪𑆾𑆩 𑆠𑇀𑆮𑆩𑆶 𑆣𑆫𑆟𑆴𑆫𑆳𑆠𑇀𑆩𑆳 𑆠𑇀𑆮𑆩𑆴𑆠𑆴 𑆖𑇅
𑆥𑆫𑆴𑆖𑇀𑆗𑆴𑆤𑇀𑆤𑆳𑆩𑆼𑆮𑆁 𑆠𑇀𑆮𑆪𑆴 𑆥𑆫𑆴𑆟𑆠𑆳𑆁 𑆧𑆴𑆨𑇀𑆫𑆠𑆴 𑆓𑆴𑆫𑆁
𑆤 𑆮𑆴𑆢𑇀𑆩𑆱𑇀𑆠𑆠𑇀𑆠𑆠𑇀𑆠𑇀𑆮𑆁 𑆮𑆪𑆩𑆴𑆲 𑆠𑆶 𑆪𑆠𑇀𑆠𑇀𑆮𑆁 𑆤 𑆨𑆮𑆱𑆴𑇆𑇒𑇗𑇆

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह
स्त्वमापस्त्वं व्योम त्वमुधरणिरात्मा त्वमिति च।
परिच्छिन्नामेवं त्वयि परिणतां बिभ्रति गिरं
न विद्यम्स्ततृतत्त्वं यमिस तु यत् त्वं न भवसि॥२७॥

The wise hold this limiting view of you. You are the Sun, You are the moon, You are the fire, You are the air, You are water, You are space, You are the earth, You are the Self. But we do not know which are the things which you are not (the truth You are everything that is sentient or insentient).

𑆠𑇀𑆫𑆪𑆵𑆁 𑆠𑆴𑆱𑇀𑆫𑆾 𑆮𑆸𑆠𑇀𑆠𑆵𑆱𑇀𑆠𑇀𑆫𑆴𑆨𑆶𑆮𑆤𑆩𑆡𑆾 𑆠𑇀𑆫𑆵𑆤𑆥𑆴 𑆱𑆶𑆫𑆳𑆤-
𑆑𑆳𑆫𑆳𑆢𑇀𑆪𑆽𑆫𑇀𑆮𑆫𑇀𑆟𑆽𑆱𑇀𑆠𑇀𑆫𑆴𑆨𑆴𑆫𑆨𑆴𑆢𑆣𑆠𑇀𑆠𑆵𑆫𑇀𑆟𑆮𑆴𑆑𑆸𑆠𑆴𑇅
𑆠𑆶𑆫𑆵𑆪𑆁 𑆠𑆼 𑆣𑆳𑆩 𑆣𑇀𑆮𑆤𑆴𑆨𑆴𑆫𑆮𑆫𑆶𑆤𑇀𑆣𑆳𑆤𑆩𑆟𑆶𑆨𑆴𑆂
𑆱𑆩𑆱𑇀𑆠𑆮𑇀𑆪𑆱𑇀𑆠𑆁 𑆠𑇀𑆮𑆳𑆁 𑆯𑆫𑆟𑆢 𑆓𑆸𑆟𑆳𑆠𑇀𑆪𑆾𑆩𑆴𑆠𑆴 𑆥𑆢𑆩𑇀𑇆𑇒𑇘𑇆

त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरान-
काराद्यैरवर्णैस्त्रिभिरमिदधत्तीर्णविकृति।
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः
समस्तव्यस्तं त्वां शरणद् गृणात्योमिति पदम्॥२६॥

O Giver of refuge(sanctuary/protection), with the three letters A, U, M indicating the three Vedas, the three states, the three worlds, and the Trinity, the word AUM (Om) describes You separately. By it's subtle sound the word Om collectively denotes You, Your Absolute Transcendental state which is free from change (is changeless, immortal, immutable and omnipotent)

𑆨𑆮𑆂 𑆯𑆫𑇀𑆮𑆾 𑆫𑆶𑆢𑇀𑆫𑆂 𑆥𑆯𑆶𑆥𑆠𑆴𑆫𑆡𑆾𑆓𑇀𑆫𑆂 𑆱𑆲𑆩𑆲𑆳𑆁-
𑆱𑇀𑆠𑆡𑆳 𑆨𑆵𑆩𑆼𑆯𑆳𑆤𑆳𑆮𑆴𑆠𑆴 𑆪𑆢𑆨𑆴𑆣𑆳𑆤𑆳𑆰𑇀𑆛𑆑𑆩𑆴𑆢𑆩𑇀𑇅
𑆃𑆩𑆶𑆰𑇀𑆩𑆴𑆤𑇀𑆥𑇀𑆫𑆠𑇀𑆪𑆼𑆑𑆁 𑆥𑇀𑆫𑆮𑆴𑆖𑆫𑆠𑆴 𑆢𑆼𑆮 𑆯𑇀𑆫𑆶𑆠𑆴𑆫𑆥𑆴
𑆥𑇀𑆫𑆴𑆪𑆳𑆪𑆳𑆱𑇀𑆩𑆽 𑆣𑆳𑆩𑇀𑆤𑆼 𑆥𑇀𑆫𑆟𑆴𑆲𑆴𑆠𑆤𑆩𑆱𑇀𑆪𑆾𑆱𑇀𑆩𑆴 𑆨𑆮𑆠𑆼𑇆𑇒𑇙𑇆

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां-
स्तथा भीमेशानाविति यदभिधानाष्टकमिदम्।
अमुष्मिन्प्रत्येकं प्रविचरति देव श्रुतरपि
प्रियायास्मै धाम्ने प्रणिहितनमस्योस्मि भवते॥२९॥

O Lord, Bhava, Sharva, Rudra, Pashupati, Ugra, Mahadeva, Bhima and Ishana, these eight most famous names of yours are most auspicious and are repeatedly talked about in Vedas (Shruti). To you most believed Lord Shankara, of resplendent form, I offer Salutations.

𑆮𑆥𑆶𑆰𑇀𑆥𑇀𑆫𑆳𑆢𑆶𑆫𑇀𑆨𑆳𑆮𑆳𑆢𑇁𑆤𑆶𑆩𑆴𑆠𑆩𑆴𑆢𑆁 𑆘𑆤𑇀𑆩𑆤𑆴 𑆥𑆶𑆫𑆳
𑆥𑆶𑆫𑆳𑆫𑆼! 𑆤𑆽𑆮𑆳𑆲𑆁 𑆑𑇀𑆮𑆖𑆴𑆢𑆥𑆴 𑆨𑆮𑆤𑇀𑆠𑆁 𑆥𑇀𑆫𑆟𑆠𑆮𑆳𑆤𑇀𑇅
𑆤𑆩𑆤𑇀𑆩𑆶𑆑𑇀𑆠𑆂 𑆱𑆩𑇀𑆥𑇀𑆫𑆠𑇀𑆪𑆠𑆤𑆶𑆫𑇁𑆲𑆩𑇁𑆓𑇀𑆫𑆼𑇁𑆥𑇀𑆪𑆤𑆠𑆴𑆩𑆳𑆤𑇀
𑆩𑆲𑆼𑆯! 𑆑𑇀𑆰𑆤𑇀𑆠𑆮𑇀𑆪𑆁 𑆠𑆢𑆴𑆢𑆩𑆥𑆫𑆳𑆣𑆢𑇀𑆮𑆪𑆩𑆥𑆴𑇆𑇓𑇐𑇆

वपुष्प्रादुर्भावादऽनुमितमिदं जन्मनि पुरा
पुरारे! नैवाहं क्वचिदपि भवन्तं प्रणतवान्।
नमन्मुक्तः सम्प्रत्यतनुरऽहमऽग्रेप्यनतिमान्
महेश! क्षन्तव्यं तदिदमपराधद्वयमपि॥३०॥

There is general belief that those who repeatedly offer salutations to Lord Shiva and always remember Him are freed from the cycle of birth and death. The composer of the Stotra (Shri Pushapdanta) asks for a pardon from The Lord for his two sins committed. One in his previous birth for not remembering Him that is why he has been given the present birth. Now that he constantly chants the holy name of the Lord, he is sure that he will never be born again and will be liberated. The poet therefore again asks for pardon as there will be not next birth for him, he cannot worship and repeat the Holy names of the Lord in future Janamas. Thus, for these two sins / mistakes he begs to be pardoned.

𑆤𑆩𑆾 𑆤𑆼𑆢𑆴𑆰𑇀𑆜𑆳𑆪 𑆥𑇀𑆫𑆴𑆪𑆢𑆮 𑆢𑆮𑆴𑆰𑇀𑆜𑆳𑆪 𑆖 𑆤𑆩𑆾
𑆤𑆩𑆂 𑆑𑇀𑆰𑆾𑆢𑆴𑆰𑇀𑆜𑆳𑆪 𑆱𑇀𑆩𑆫𑆲𑆫 𑆩𑆲𑆴𑆰𑇀𑆜𑆳𑆪 𑆖 𑆤𑆩𑆂𑇅
𑆤𑆩𑆾 𑆮𑆫𑇀𑆰𑆴𑆰𑇀𑆜𑆳𑆪 𑆠𑇀𑆫𑆴𑆤𑆪𑆤 𑆪𑆮𑆴𑆰𑇀𑆜𑆳𑆪 𑆖 𑆤𑆩𑆾
𑆤𑆩𑆂 𑆱𑆫𑇀𑆮𑆱𑇀𑆩𑆽 𑆠𑆼 𑆠𑆢𑆴𑆢𑆩𑆴𑆠𑆴 𑆱𑆫𑇀𑆮𑆳𑆪 𑆖 𑆤𑆩𑆂𑇆𑇓𑇑𑇆

नमो नेदिष्ठाय प्रियदव दविष्ठाय च नमो
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः।
नमो वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो
नमः स्र्वस्मै ते तदिदमिति सर्वाय च नमः॥३१॥

O Lover of Solitude, my salutation to You Who are the nearest and the farthest. O Destroyer of the god of Love (Kamdeva), my Salutations to You Who are the minutest as well as the largest. O Three-eyed One, my salutations to You Who are the oldest as also the youngest. My salutation to you again and again Who are all and also transcending all.

𑆧𑆲𑆬𑆫𑆘𑆱𑆼 𑆮𑆴𑆯𑇀𑆮𑆾𑆠𑇀𑆥𑆠𑇀𑆠𑆿 𑆨𑆮𑆳𑆪 𑆤𑆩𑆾 𑆤𑆩𑆂𑇅
𑆥𑇀𑆫𑆮𑆬𑆠𑆩𑆱𑆼 𑆠𑆠𑇀𑆱𑆁𑆲𑆳𑆫𑆼 𑆲𑆫𑆳𑆪 𑆤𑆩𑆾 𑆤𑆩𑆂𑇆
𑆘𑆤𑆱𑆶𑆒𑆑𑆸𑆠𑆼 𑆱𑆠𑇀𑆠𑇀𑆮𑆾𑆢𑇀𑆫𑆴𑆑𑇀𑆠𑆿 𑆩𑆸𑆝𑆳𑆪 𑆤𑆩𑆾 𑆤𑆩𑆂𑇅
𑆥𑇀𑆫𑆩𑆲𑆱𑆴 𑆥𑆢𑆼 𑆤𑆴𑆱𑇀𑆠𑇀𑆫𑆽𑆓𑆶𑆟𑇀𑆪𑆼 𑆯𑆴𑆮𑆳𑆪 𑆤𑆩𑆾 𑆤𑆩𑆂 𑇆𑇓𑇒𑇆

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः।
प्रवलतमसे तत्संहारे हराय नमो नमः॥
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः।
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३२॥

Salutation to you O Lord, as Brahama in Whom Rajas prevails for the creation of the universe. Salutation to you as Rudra in Whom the Tamas prevails for the destruction of the evil. Salutation to you as Vishnu in Whom the Sattva prevails for giving happiness and protection to the people. Salutations to You, O Shiva, Who are effulgent and beyond the three attributes ( Gunas- Satvaguna, Rajoguna and Tamoguna ).

𑆑𑆸𑆯𑆥𑆫𑆴𑆟𑆠𑆴 𑆖𑆼𑆠𑆂 𑆑𑇀𑆬𑆼𑆯𑆮𑆯𑇀𑆪𑆁 𑆑𑇀𑆮𑆖𑆼𑆢𑆁
𑆑𑇀𑆮𑆖 𑆠𑆮 𑆓𑆶𑆟𑆱𑆵𑆩𑆾𑆬𑇀𑆬𑆳𑆕𑇀𑆔𑆴𑆤𑆵 𑆯𑆯𑇀𑆮𑆢𑆸𑆢𑇀𑆣𑆴𑆂𑇅
𑆅𑆠𑆴 𑆖𑆑𑆴𑆠𑆨𑇁𑆩𑆤𑇀𑆢𑆵𑆑𑆸𑆠𑇀𑆪 𑆩𑆳𑆁 𑆨𑆑𑇀𑆠𑆴𑆫𑆳𑇁𑆣𑆳-
𑆢𑇀𑆮𑆫𑆢 𑆖𑆫𑆟𑆪𑆾𑆱𑇀𑆠𑆼 𑆮𑆳𑆑𑇀𑆪𑆥𑆶𑆰𑇀𑆥𑆾𑆥𑆲𑆳𑆫𑆩𑇀𑇆𑇓𑇓𑇆

कृशपरिणति चेतः क्लेशवश्यं क्वचेदं
क्वच तव गुणसीमोल्लाङ्घिनी शश्वदृद्धिः।
इति चकितभऽमन्दीकृत्य मां भक्तिराऽधा-
द्वरद चरणयोस्ते वाक्यपुष्पोपहारम्॥३३॥

O Giver of the boons, how poor is my ill developed mind, subject to afflictions and how boundless is Your Divinity, Eternal and possessing infinite virtues. Though terror stricken because of this, I am inspired by my devotion to offer You this hymnal garland and place it at Your lotus feet.

𑆱𑆶𑆫𑆨𑆶𑆘𑆓𑆤𑆫𑆼𑆤𑇀𑆢𑇀𑆫𑆽𑆫𑆫𑇀𑆖𑆴𑆠𑆱𑇀𑆪𑆼𑆤𑇀𑆢𑆶𑆩𑆿𑆬𑆼𑆂
𑆥𑇀𑆫𑆡𑆴𑆠𑆓𑆶𑆟𑆓𑆫𑆴𑆩𑇀𑆟𑆾 𑆘𑇀𑆚𑆳𑆤𑆑𑆳𑆫𑆶𑆟𑇀𑆪𑆩𑆷𑆫𑇀𑆠𑆼𑆂𑇅
𑆱𑆑𑆬𑆓𑆶𑆟𑆮𑆫𑆼𑆟𑇀𑆪𑆂 𑆥𑆶𑆰𑇀𑆥𑆢𑆤𑇀𑆠𑆳𑇁𑆨𑆴𑆣𑆳𑆤𑆾
𑆮𑇀𑆪𑆢𑆣𑆢𑇁𑆬𑆔𑆶𑆮𑆸𑆠𑆽𑆂 𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆩𑆼𑆠𑆢𑇀𑆓𑆫𑆵𑆪𑆂𑇆𑇓𑇔𑇆

सुरभुजगनरेन्द्रैरर्चितस्येन्दुमौलेः
प्रथितगुणगरिम्णो ज्ञानकारुण्यमूर्तेः।
सकलगुणवरेण्यः पुष्पदन्ताऽभिधानो
व्यदधदऽलघुवृतैः स्तोत्रमेतद्गरीयः॥३४॥

O Lord, you are worshiped by gods like Indra and great Gyanis and sages, who are full of great virtues. I, Pushpdanta, though dull witted, yet I have, out of my great devotion composed this Stotra as my humble offering to You.

𑆃𑆱𑆴𑆠𑆓𑆴𑆫𑆴𑆱𑆩𑆁 𑆱𑇀𑆪𑆳𑆠𑇀𑆑𑆘𑇀𑆘𑆬𑆁 𑆱𑆴𑆤𑇀𑆣𑆶𑆥𑆳𑆠𑇀𑆫𑆼
𑆱𑆶𑆫𑆠𑆫𑆶𑆮𑆫𑆯𑆳𑆒𑆳 𑆬𑆼𑆒𑆤𑆵 𑆥𑆠𑇀𑆫𑆩𑆶𑆫𑇀𑆮𑆵𑇅
𑆬𑆴𑆒𑆠𑆴 𑆪𑆢𑆴 𑆓𑆸𑆲𑆵𑆠𑇀𑆮𑆳 𑆯𑆳𑆫𑆢𑆳 𑆱𑆫𑇀𑆮𑆑𑆳𑆬𑆁
𑆠𑆢𑆥𑆴 𑆠𑆮 𑆓𑆶𑆟𑆳𑆤𑆳𑆩𑆵𑆯! 𑆥𑆳𑆫𑆁 𑆤 𑆪𑆳𑆠𑆴𑇆𑇓𑇕𑇆

असितगिरसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदापि तव गुणानामीश! पारं न याति॥३५॥

O Lord, if the black mountain be the ink, the ocean the inkpot, the branch of the stout wish fulfilling tree (Kalpavraksha) a pen, the whole earth the writing leaf (paper) and if taking these, the Goddess of learning, Mata Sharada writes till eternity, even then the limit of Your Virtues can not be reached (will remain unfathomable).

𑆃𑆱𑆶𑆫𑆱𑆶𑆫𑆩𑆶𑆤𑆵𑆤𑇀𑆢𑇀𑆫𑆽𑆫𑆫𑇀𑆖𑆴𑆠𑆱𑇀𑆪𑆼𑆤𑇀𑆢𑆶𑆩𑆿𑆬𑆼𑆂
𑆥𑇀𑆫𑆡𑆴𑆠𑆓𑆶𑆟𑆩𑆲𑆴𑆩𑇀𑆤𑆾 𑆘𑇀𑆚𑆳𑆤𑆑𑆳𑆫𑆶𑆟𑇀𑆪𑆩𑆷𑆫𑇀𑆠𑆼𑆂𑇅
𑆱𑆑𑆬𑆓𑆶𑆟𑆮𑆫𑆼𑆟𑇀𑆪𑆂 𑆥𑆶𑆰𑇀𑆥𑆢𑆤𑇀𑆠𑆳𑆨𑆴𑆣𑆳𑆤𑆾
𑆫𑆶𑆖𑆴𑆫𑆩𑆬𑆔𑆶𑆮𑆸𑆠𑇀𑆠𑆽𑆂 𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆩𑆼𑆠𑆠𑇀 𑆖𑆑𑆳𑆫 𑇆𑇓𑇖𑇆

असुरसुरमुनीद्रैरर्चितस्येन्दुमौलेः
प्रथितगुणमहिमनो ज्ञानकारुण्यमूर्तेः।
सकलगुणवरेण्यः पुष्पदन्ताभिधानो
रुचिरमलधुवृत्तैः स्तोत्रमेतत् चकार ॥३६॥

The best of Gandharvas, Pushpadanta, composed in great devotion this beautiful and elevating hymn to Lord Shiva, Who is worshiped by demons, gods and the best of sages, Whose praises have been sung, Who has a moon on His Forehead and Who is Attributeless.

𑆃𑆲𑆫𑆤𑆮𑆢𑇀𑆪𑆁 𑆣𑆷𑆫𑇀𑆘𑆛𑆼𑆂 𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆩𑆼𑆠𑆠𑇀
𑆥𑆜𑆠𑆴 𑆥𑆫𑆩𑆨𑆑𑇀𑆠𑇀𑆪𑆳 𑆯𑆶𑆢𑇀𑆣𑆖𑆴𑆠𑆂 𑆥𑆶𑆩𑆳𑆤𑇀𑆪𑆂𑇅
𑆱 𑆨𑆮𑆠𑆴 𑆯𑆴𑆮𑆬𑆾𑆑𑆼 𑆫𑆶𑆢𑇀𑆫𑆠𑆶𑆬𑇀𑆪𑆱𑇀𑆠𑆡𑆳𑇁𑆠𑇀𑆫
𑆥𑇀𑆫𑆖𑆶𑆫𑆠𑆫𑆣𑆤𑆳𑆪𑆶𑆂 𑆥𑆶𑆠𑇀𑆫𑆮𑆳𑆤𑇀𑆑𑆵𑆫𑇀𑆠𑆴𑆩𑆳𑆁𑆯𑇀𑆖𑇆𑇓𑇗𑇆

अहरनवद्यं धूर्जटेः स्तोत्रमेतत्
पठति परमभक्त्या शुद्धचितः पुमान्यः।
स भवति शिवलोके रुद्रतुल्यस्तथाऽत्र
प्रचुरतरधनायुः पुत्रवान्कीर्तिमांश्च॥३७॥

Any person who with a purified heart and with great devotion always recites this beautiful and elevating hymn to Shiva, becomes like Shiva (after death) in the abode of Shiva, and while living in this world gets abundant wealth, long life, good progeny and fame.

𑆢𑆵𑆑𑇀𑆰𑆳 𑆢𑆳𑆤𑆁 𑆠𑆥𑆱𑇀𑆠𑆵𑆫𑇀𑆡𑆱𑇀𑆤𑆳𑆤𑆁 𑆪𑆾𑆓𑆳𑆢𑆴𑆑𑆳𑆂 𑆑𑇀𑆫𑆴𑆪𑆳𑆂𑇅
𑆩𑆲𑆴𑆩𑇀𑆤𑆱𑇀𑆠𑆮 𑆥𑆳𑆜𑆱𑇀𑆪 𑆑𑆬𑆳𑆁 𑆤𑆳𑆫𑇀𑆲𑆤𑇀𑆠𑆴 𑆰𑆾𑆝𑆯𑆵𑆩𑇀𑇆
𑆩𑆲𑆼𑆯𑆳𑆤𑇀𑆤𑆳𑆥𑆫𑆾 𑆢𑆼𑆮𑆾 𑆩𑆲𑆴𑆩𑇀𑆤𑆾 𑆤𑆳𑆥𑆫𑆳 𑆱𑇀𑆠𑆶𑆠𑆴𑆂𑇅
𑆃𑆔𑆾𑆫𑆳𑆤𑇀𑆤𑆳𑆥𑆫𑆾 𑆩𑆤𑇀𑆠𑇀𑆫𑆾𑆂 𑆤𑆳𑆱𑇀𑆠𑆴 𑆠𑆠𑇀𑆠𑇀𑆮𑆁 𑆓𑆶𑆫𑆾𑆂 𑆥𑆫𑆩𑇀𑇆𑇓𑇘𑇆

दीक्षा दानं तपस्तीर्थस्नानं योगादिकाः क्रियाः।
महिमन्स्त्व पाठस्य कलां नार्हन्ति षोडशीम्॥
महेशान्नापरी देवो महिम्नो नापरा स्तुतिः।
अघोरान्नापरो मन्त्रोः नास्ति तत्त्वं गुरोः परम्॥३८॥

Initiation into spiritual life, charities, austerities, pilgrimage, practice of Yoga, performance of sacrificial rites - none of these gives even one sixteenth of the merit that one gets by reciting the Mahimna Stotram hymn on the greatness of Shiva. There is no God higher than Shiva, there is no hymn better than hymn on the greatness of Shiva, there is no mantra more powerful than the name of Shiva, there is

nothing higher to be known than the real nature of the Guru.

𑆑𑆶𑆱𑆶𑆩𑆢𑆯𑆤𑆤𑆳𑆩𑆳 𑆱𑆫𑇀𑆮𑆓𑆤𑇀𑆣𑆫𑇀𑆮𑆫𑆳𑆘𑆂
𑆯𑆴𑆯𑆶𑆣𑆫𑆮𑆫𑆩𑆿𑆬𑆼𑆫𑇀𑆢𑆼𑆮𑆢𑆼𑆮𑆱𑇀𑆪 𑆢𑆳𑆱𑆂𑇅
𑆱 𑆓𑆶𑆫𑆶𑆤𑆴𑆘𑆩𑆲𑆴𑆩𑇀𑆤𑆾 𑆨𑇀𑆫𑆰𑇀𑆛 𑆍𑆮𑆳𑆱𑇀𑆪 𑆫𑆾𑆰𑆳𑆠𑇀
𑆱𑇀𑆠𑆮𑆤𑆩𑆴𑆢𑆩𑆑𑆳𑆫𑇀𑆰𑆵𑆢𑇀𑆢𑆴𑆮𑇀𑆪𑆢𑆴𑆮𑇀𑆪𑆁 𑆩𑆲𑆴𑆩𑇀𑆤𑆂𑇆𑇓𑇙𑇆

कुसमदशननाभा सर्वगन्धर्वराजः
शिशुधरवरमौलेर्देवदेवस्य दासः।
स गुरुनिजमहिम्नो भ्रष्ट एवास्य रोषात्
स्तवनमिदमकार्षीद्धिव्यदिव्यं महिम्नः॥६९॥

The Lord of the Gandharvas, Pushpdanta by name, is the servant of the God of gods, Who had the crescent moon on his forehead. Fallen from his glory due to the wrath of the Lord, he composed this very beautiful and uplifting hymn on the greatness of Shiva to regain His favour.

𑆱𑆶𑆫𑆮𑆫𑆩𑆶𑆤𑆴𑆥𑆷𑆘𑇀𑆪𑆁 𑆱𑇀𑆮𑆫𑇀𑆓𑆩𑆾𑆑𑇀𑆰𑆽𑆑𑆲𑆼𑆠𑆶𑆁𑇅
𑆥𑆜𑆠𑆴 𑆪𑆢𑆴 𑆩𑆤𑆶𑆰𑇀𑆪𑆂 𑆥𑇀𑆫𑆳𑆚𑇀𑆘𑆬𑆴𑆫𑇀𑆤𑆳𑆤𑇀𑆪𑆖𑆼𑆠𑆳𑆂𑇆
𑆮𑇀𑆫𑆘𑆠𑆴 𑆯𑆴𑆮𑆱𑆩𑆵𑆥𑆁 𑆑𑆴𑆤𑇀𑆤𑆫𑆽𑆂 𑆱𑇀𑆠𑆷𑆪𑆩𑆳𑆤𑆂𑇅
𑆱𑇀𑆠𑆮𑆤𑆩𑆴𑆢𑆩𑆩𑆾𑆔𑆁 𑆥𑆶𑆰𑇀𑆥𑆢𑆤𑇀𑆠𑆥𑇀𑆫𑆟𑆵𑆠𑆩𑇀𑇆𑇔𑇐𑇆

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं।
पठति यदि मनुष्यः प्राञ्जलिर्नान्यचेताः॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः।
स्तवनमिदममोघं पुष्पदन्तप्रणीतम॥४०॥

If anyone with single minded devotion and folded palms reads this unfailing hymn composed by Pushpadanta, which is adored by Devatas and the best of sages and which grants heaven and liberation, one goes to Shiva and is worshiped by Kinnaras (celestial beings).

𑆯𑇀𑆫𑆵 𑆥𑆶𑆰𑇀𑆥𑆢𑆤𑇀𑆠 𑆩𑆶𑆒𑆥𑆕𑇀𑆑𑆘𑆤𑆴𑆫𑇀𑆓𑆠𑆼𑆤
𑆱𑇀𑆠𑆾𑆠𑇀𑆫𑆼𑆤 𑆑𑆴𑆬𑇀𑆮𑆴𑆰𑆲𑆫𑆼𑆟 𑆲𑆫𑆥𑇀𑆫𑆴𑆪𑆼𑆟𑇅
𑆑𑆟𑇀𑆜𑆱𑇀𑆡𑆴𑆠𑆼𑆤 𑆥𑆜𑆴𑆠𑆼𑆤 𑆱𑆩𑆳𑆲𑆴𑆠𑆼𑆤
𑆱𑆶𑆥𑇀𑆫𑆵𑆟𑆴𑆠𑆾 𑆨𑆮𑆠𑆴 𑆨𑆷𑆠𑆥𑆠𑆴𑆫𑇀𑆩𑆲𑆼𑆯𑆂𑇆𑇔𑇑𑇆

श्री पुष्पदन्त मुखपङ्कजनिर्गतेन
स्तोत्रेन किल्विषहरेण हरप्रियेण।
कण्ठस्थितेन पठितेन समाहितेन
सुप्रीणितो भवति भूतपतिर्महेशः॥४१॥

If Person learns by heart and recites this hymn, which flowed from the mouth of Shri Pushpdanta, which destroys sins and is dear to Shiva and which equally promotes the good of all, the Lord of Creation, becomes very pleased.

𑆅𑆠𑇀𑆪𑆼𑆰𑆳 𑆮𑆳𑆕𑇀𑆩𑆪𑆵 𑆥𑆷𑆘𑆳 𑆯𑇀𑆫𑆵𑆩𑆖𑇀𑆗𑆕𑇀𑆑𑆫𑆥𑆳𑆢𑆪𑆾𑆂
𑆃𑆫𑇀𑆥𑆴𑆠𑆳 𑆠𑆼𑆤 𑆩𑆼 𑆢𑆼𑆮𑆂 𑆥𑇀𑆫𑆵𑆪𑆠𑆳𑆁 𑆖 𑆱𑆢𑆳𑆯𑆴𑆮𑆂𑇅

इत्येषा वाङ्मयी पूजा श्रीमच्छङ्करपादयोः
अर्पिता तेन मे देवः प्रीयतां च सदाशिवः।

This hymn worship is offered at the feet of Shiva. May the Ever Beneficent Lord be pleased with me at this.

--ॐ नमःशिवाय--





# प्रश्नोत्तरी- ३ / प्र्नोइुरी- ३

Vinutha Saligram

प्रश्नोत्तरी के बारे में जानकारी

- प्रश्न शारदा लिपि में हैं।
- प्रतियोगी शारदा वर्णमाला (मातृका के पिछले अंकों में प्रकाशित), कोर शारदा टीम द्वारा प्रकाशित पुस्तकों आदि की सहायता ले  सकते हैं।
- प्रत्येक प्रश्न के लिए चार विकल्प हैं।

उतर ,अपने व अपने शहर के नाम के साथ

maatrika.cst@gmail.com पते पर भेजें।

सही उत्तर देने वाले का नाम अगले अंक में प्रकाशित किये जायेंगे।

